॥ अथवोधायनश्रामीप्रयोगः ॥

-पाग्नीध्र
१

श्रीगणेशायनमः॥अथआग्नीध्रप्रयोगः॥तीर्थेस्नात्वाहतंवासःपरि
धायएकविंशत्यादर्भपिंजूलेरात्मानंपावयित्वा॥सप्तभिःकंठादुप
र्युन्मज्यसप्तभिर्नाभेरुपर्याकंठमुन्मज्जेत्॥सप्तभिर्नाभेरधस्तागुल्फं॥
त्रेधाविभक्तान्समुच्चित्याद्भिरभ्युक्ष्योदङ्मुखस्यापउपस्पृशेत्॥
मंत्रेराचामेत्॥आपोहि०चक्षसे॥इतिप्रथमं॥योवःशिवत०मातरः॥
इतिद्वितीयं॥तस्माअरंग०चनः॥इतितृतीयं॥ततोव्याहृतिभिर्भू
यःस्वरिति॥ऊर्ध्वोधरोष्ठौपृथक्परिमृज्य॥ताभिरेवपुनरुभौ
युगपत्परिमृजंति॥ततःसव्यंपाणिंपादौशिरश्चस्पृशेन्नासिकेथो
ह्रदयंचालभेत॥ततःप्रतिमंत्रंमार्जयेत्॥दधिक्राव्णोअका

रिषं०प्रणआयूँषितारिषत्॥आपोहिष्ठा०ऋक्॥यश्चिद्धितोवशोयथा०
ऋक्॥यत्किंचेदंवरुणदैव्येजनेभिद्रोहंमनुष्याश्चरामसि॥अचित्तीय
त्तवधर्मायुयोपिममानस्तस्मादेनसोदेवरीरिषः॥कितवासोयद्रि
रिपुर्नदीवियद्वायासत्यमुतयन्नविद्म॥सर्वाताविष्यशिथिरेवाथा
तेस्यामवरुणप्रियासः॥हिरण्यवर्णाःशुचयःपावकायासुजातः
कश्यपोयासिंइः॥अग्नेंयागर्भ०यासुंराजावरुणो०मधुश्चुतः०
तास्नआपःशंस्योनाभवंतु॥यासांदेवादिविकृण्वंति०॥याःपृ
थिवीपयसोदंति०॥शिवेनमाचक्षुषापश्यताप्रः०सर्वाँअग्नीँ
रक्ष॥४॥पवमानःसुवर्जनः॥पवित्रेण०यःपोता०पुनंतुमाद्दं०

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

पुनंतुमनवोधिया॰पुनंतुविः॰जातवेदः॰पवित्रेणेण॰शुक्रेण॰अग्नेक्रत्वा॰य
नेपवित्र॰अग्नेवितनंत॰ब्रह्मनेन॰उभाभ्यांदेव॰पवित्रेण॰इदंब्रह्म॰वेश्चदे
वीपुनतीदेव्यागात्॥यस्येवर्कीः॰तयामदंतः॰वरंयामपत॰वेश्वानरो॰
वातःप्राणे॰द्यावापृथिवी॰क्रतावरी॰बृहद्भिः॰वर्षिष्ठे॰अग्नेदक्षे॰ये
नदेवा॰येनापो॰तेनदिव्येन॰इदंब्रह्म॰यःपावनीर॰ऋषिभिः॰सर्वं
स॰स्वदितमा॰पावमानीर्यो॰ऋषिभिः॰तस्मेसर॰क्षीरं॰पावमानी॰
सऽइषा॰ऋषिभिः॰ब्राह्मणे॰पावमानीर्दिशं॰इमंलोकमथो॰कामा
न्तामर्धयं॰देवीर्देवी॰पावमानीः॰स्व॰सऽइषाहि॰ऋषिभिः॰ब्राह्मणे॰
येनदेवाः॰आत्मानंपुनते॰तेनसहस्रधारेण॥पावमान्यः॰प्राजाप॰ २

शतोधामंहि॰तेनब्रह्मविदो॰पूतंब्रह्म॰इंदुः॰सनी॰सोमः॰स्वस्या॰यमो
राजा॰जातवेदा॰कयानश्चित्र॰कयाशचि॰कस्वासत्या॰मंहिष्ठा॰
दक्षाचि॰अभीषुणः॰शतंधारा॰तरसमंदी॰तरत्स॰ऋकृ४शनोदेवी॰
रभि॰ऋकृ१इतिपत्र्चमार्जयित्वा॥तीर्थेनप्रविश्यगार्हपत्यादुत्तरतः
प्राङ्मुखउपविश्य॥तत्रऋध्यतांतत्रेसमध्यतांतत्रेसंपद्यतांकामः
यजमानोब्रूयात्॥तदाहुतोसिकर्मकरिष्यामीतिब्रूयात्॥इजा
देवहूर्मनु॰पितरोनुमदंतु॥उच्चैःसमाहंतवेइतिश्रुत्वाशम्यामादा
यद्विर्हविषादक्षकृत्पत्नीयांसमाहंति॥इषमावदोर्जमावदद्युमद्द
तवंसंधातंजेषम॥एवंविः॥सर्वाणिपात्राणिहूर्ष्णीसक्रत्समाद

ति॥समाहननं दर्भपारवेणशम्ययावा॥आहरापआनयेतिश्रुत्वा॥वामह
स्तेनवेदोपरिपात्रंधारयन्दक्षिणेनस्रुवेणप्रणीताभ्योजलमादायपात्रे
निधाय॥तथैवमदक्षीणाभ्यआदायपात्रेनिदधाति॥तत्पात्रमध्वर्यवेत्र
यच्छति॥अग्नीदितास्त्रिर्हरेतिश्रुत्वा॥स्रावदेशात्पाणिनामदमादा
यउत्करेनिवपति॥इतित्रिः॥प्रोक्षणीरासादयेतित्रेपंश्रुत्वाकमंडलु
जलेनप्रोक्षणीरभिपूर्याध्वर्योर्दक्षिणतोहत्वाध्वर्यवेददाति॥उत्तरे
णाहवनीयंदक्षिणमिध्ममुत्तरंबर्हिःप्रागग्रंनिदधाति॥अथदक्षिणे
नस्रुवंजुहूंप्रतःसव्येनश्रुवंप्राशित्रहरणंवेदपरिवासनानिचादा
यगार्हपत्योत्तरतःप्राङ्उपविश्यगार्हपत्येप्रतितपति॥प्रत्युष्टं

रक्षःप्रत्युष्टाअरातयोनिष्टप्तंरक्षोनिष्टप्तमरातिंदुवस्वतीरुपयामगृहीतोसि॥सक्रुन्मंत्रेणाहुत्वा
ष्ठी॥अथादग्नेर्वेदपरिवासनेदक्षिणंपाणिनावेद्यसव्येनप्राक्शिरं
सःश्मश्रुंवंगृह्योत्वा॥गोघंमानिर्मक्षंवानिनंत्वासपलसाहंसंमार्ज्मि॥
स्रुवाभ्यंतरदेशंप्रदक्षिणंप्रागपवर्गंसमार्ष्टि॥सक्रुन्मंत्रेणाहुत्वाष्ठी॥
तत्रोन्यग्भूतंप्रत्यग्ग्रंनिधायवाह्यप्रदेशंप्रदक्षिणंप्रत्यगपवर्गंत्रिस्त्वा
ष्ठीसंमृज्यपूर्ववद्धुत्वावेदपरिवासनमूलेदक्षस्याधःप्रदेशंप्रत्य
गपवर्गंत्रिस्त्वाष्ठीसंमृज्योपरिष्टाग्ग्रंत्रिस्त्वाष्ठीसंमार्ष्टि॥स्रुवाद्भिः
स्पृश्यगार्हपत्यप्रतप्यपरिकर्मिणश्रुक्संमृज्यप्रयच्छति॥स्रुव

वज्रऊर्ं संमार्ष्टि॥वाचंप्राणंमानिर्मृक्ष्वाजिनींत्वासपत्नसाहीꣳसंमार्ज्मि॥
तथेवापभृतं॥चक्षुःश्रोत्रंमानिर्मृक्षंवाजिनींत्वासपत्नसाहीꣳसमार्ज्मि॥
तथेवध्रुवां॥प्रजांयोनिंमानिर्मृक्षंवाजिनींत्वासपत्नसाहीꣳसंमार्ज्मि॥
तथेवग्राशित्रहरणं॥रूपंवर्णंपशुभ्योमानिर्मृक्षंवाजित्वासपत्नसादि
संमार्ज्मि॥नवाग्राशित्रहरणंसंमृजेत्॥नादायान्निष्टपेत्॥संमा
र्जनानिविस्रस्याद्भिरभ्युक्ष्यगार्हपत्येग्रहरति॥दिवःशिल्पमवतं
पृथिव्याःककुभिःश्रितं॥तेनवयꣳसहस्रवशोनसपत्नेनाशया
मासिस्वाहा॥अग्नेगोकरंदर्भमꣳसीर्यतेपुसंमार्गक्रमणप्राग

ग्रास्कचःसादयति॥अथाधानेसहादिक्षतांपत्नीतार्थेनग्रपाद्यगार्हपत्य
स्यदक्षिणपश्चिमदेशेदुर्ध्वंजानुमुदञ्चंवीमासीमुभयतःपाशेनयोक्त्रे ना
णग्रदक्षिणमभ्यंतरंवासःसन्नह्यति॥आशासानासोमनसंप्रजांꣳसौ
भाग्यंतनूं॥अग्नेरनुव्रतापूत्वासन्नह्येसुकृतायकं॥उत्तरेणनाभिंनि
धृत्यंग्रंथिंकृत्वादक्षिणेननाभिमवाचीनपाशमूर्ध्वंनिर्मोनंबध्वावा
चयति॥युक्तंक्रियाताग्राशीःकामेप्रत्याते॥पत्यवेनेकल्पेज्येछानु
क्रमणतीर्थेनग्रवेशः॥ज्येछानुदृछमुपवेशनंसंनहनंच॥एकैकां
सनूदग्येकांगार्हपत्यमीक्षयेदेकैकामात्मनंक्षयेत्॥युगपद्वा

श्रंधाया श्रणलोपोर्वधिरायामवाचनं॥तस्यामनालंभुक्त्वादिनाग्नि
विद्यमानायांस्वायतनेयजमानएवैतान्मंत्रान्निगदेत्॥योल्कामंतर्वे
दिश्रोण्यामुदगग्नंनिदध्यात्॥तल्लियांपुत्रोंतेवासीवाध्वर्युर्वाकुर्यात्॥
श्रनेकत्वेत्वेकस्यामविद्यमानायांतत्कर्माप्यंतरेयाकारयेत्॥श्रवेक्ष
णाभावादाज्यस्यतेजोसीतिनगार्हपत्येधिश्रयणं॥योल्कविमोचन
कालेहोतास्त्वामुंचामीतिमंत्रेणयोल्कामादधात्॥मध्येश्रयोगम
नालंभुकायांतामपरुध्यान्यःकुर्यात्॥स्त्रीप्रसवेमासंपुत्रप्रसवेषडहं स्व
शतिरात्रं॥हविष्यायांयावदारोग्यं॥पत्नीतिरःपवित्रमपाच्यौ

मयति॥पयस्वतीरोषधयःपयस्वद्दीरुधांपयः॥श्रद्भिःपयसोयत्पयस्तेन
मामिंद्रसंसृज॥इतिपिबेद्द्विस्त्रिर्वा॥श्राचमनशेषंसमाप्यगार्ह प
त्यंपरिषिंच्य॥चेतस्त्रःसमिधश्राधापयति॥श्रग्नेव्रतपतेव्रतंचरिष्या
मितच्छकेयंतन्मेराध्यतांस्वाहा॥यजमानश्रग्नयेव्रतपतयइदं॥
वायोव्रतपतयेव्र०॥वायवेव्रतपतयइदं॥श्रादित्यव्रतपते०॥श्रादित्यायव्रत्स
तपतयइदं॥व्रतानांव्रतपते०॥व्रतानांव्रतपतयइदं॥गार्हपत्यंपुनः
परिषिंचति॥पत्नीजघनेगार्हपत्यमासनात्तृणंनिरस्यापउपस्पृ
श्यश्राग्नेरुपविश्यजपति॥सुप्रजसस्त्वायय॰सुपत्नीरुपसेदिम॥

अग्नेसपत्नदंभनमदब्धासोअदाभ्यं॥इंद्राणीवाविथनाभूयसमदितिरि
वस्रुपत्नी॥अरूरित्वागार्हपत्यायनिषदेरूप्रजास्त्वाय॥ममपुत्राः
शत्रुहणोथोमेदुहितावीराट्॥उताहमस्मिसंजयापत्युर्मेलोकउ
त्तमः॥उनतिरिक्थंधीयते॥गार्हपत्यमवेक्षयति॥अग्नेगृहपतउ
पमाकेयस्वदेवानांपत्नीरूपमाकेयंपतिपत्येपतेलोकोनम
स्तेअस्तुमामाहिंसीः॥आज्यमवेक्षयति॥महीनांपयोस्योष
धीनांरसोदब्धोनत्वाचक्षुषावेरूप्रजास्त्वाय॥सानिमील्या
वेक्षयानिमीलति॥पत्न्यवेक्षयतिमाज्यंगार्हपत्येधिश्रयति॥ ६

तेजोसि॥समिधमाज्यस्थाल्यावधस्तात्कृत्वाप्राङुहरति॥तेजोनु
प्रेहि॥आज्यमाहवनीयेधिश्रयति॥अग्निस्तेजोमाविनेत्॥समि
धमाहवनीयेभ्यादधाति॥स्वाहा॥अग्नेप्रेक्षणीःपर्याहृत्योत्तर्वे
दिमस्यस्यवर्त्मनिदक्षिणआसादयति॥अग्नीदग्नींस्त्रिःस्त्रिः
समट्टीतिभ्रुत्वा॥अग्नीदिध्मसंनहनैःसहस्रुवमादायजघनेना
हवनीयमुविश्यमध्यमंपरिधिंत्रिरुदगपवर्गंसमार्ष्टि॥अग्रेणाह
वनीयंगत्वादक्षिणतःप्राङुखउपविश्यादक्षिणंपरिधिंत्रागप
वर्गंत्रिःसमार्ष्टि॥यथागतमंत्योत्तरतःप्राङुखउपविश्योत्त

रंपरिधंत्रागपवर्गेत्रिःसंमार्ष्टि।।पश्चात्सव्यमंत्रेणाग्निंत्रिरुपवीजय
ति।।अग्नेवाजिजिद्वाजंत्वाग्नेसरिष्यंतंवाजंजेष्यंतंवाजिनंवाजजि
तंवाजजित्यायैसमाज्म्यमिमन्नादमन्नाद्यायं।।सकृन्मंत्रेणाहु
स्तूष्णीं।।अध्वर्युश्राव्यप्रत्याश्रावितेअरुश्रोऽ३षट्।।इडाभाजं
प्राश्यद्विराचम्यबर्हिषिमार्जयते।।ब्रह्मणेप्राशित्रंपरिहृतेरेश्रुत्वा
सोदपात्रंप्राशित्रमग्नेणाहवनीयंब्रह्मणेपरिहरति।।नासिका
यांवायोरंतःकृत्वापान्य।।स्वभागंप्रतिगृह्णीष्वदेवस्त्वास
वितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांप्रतिगृह्णामिरा

जात्वावरुणोनयतुदक्षिणेवाचंनेतेनामृतत्वमश्यांवायोदात्रेभूया
न्मयोमह्यमरुःप्रतियहीत्रे।।कद्रुंकस्माअदात्कामःकामायादात्का
मोदातात्कामःप्रतियहीतात्कामैतत्तेसमृद्धमाधिशकामेनत्वाप्रति
गृह्णामिकामैतन्नएषातेकामदक्षिणोनानस्त्वागीरसःप्रति
गृह्णातु।।प्राश्याचम्य।।अन्वाहार्यंप्रतिगृह्यपूर्ववत्।।देवस्त्वा०
हस्ताभ्यांप्रतिगृह्णामिराजात्वावरुणोनयतुदक्षिणेब्रह्मण
ओदनंतेनामृतत्वमश्यांवायो०कद्रुंकस्मा०उन्नानस्त्वागीर
सःप्रतिगृह्णातु।।अग्नीदयीन्सकृत्सकृत्समृद्धीतिश्रपयति।।

आग्नीध्र स्रुग्घ्यसन्नहनेः पूर्ववत्परिधी॰सकृत्सकृत्समभ्यसकृदाज्यंसंस्कृ
८ मार्ष्टि॰॰यमेवाजिघ्रज्जंत्वाग्नेससृवा॰संवाजंजिगीवां॰संवाजि
नंवाजजितंवाजिनित्वायेसंमार्ज्म्यग्निमन्नादमन्नाद्यायं॰॰इध्मसं
न्नहनानिविस्रस्याङ्गिसं॰स्पृश्याहवनीयेनुप्रहरति॰॰योनृतानाम
धिपतीरुद्रस्तंतिचरोक्षणं॰॰पशूनस्माकंमाहि॰सीरेतदग्नुक
तंतवस्वाहा॰॰अपस्रुत्य॰ईशतेध्वर्युः॰अग्नीत्॰॰आग्नीध्रःसंव
दस्व॰॰अध्वर्युःअग्नानग्नीत्॰॰आग्नीध्रःआगन्॰॰अध्वर्युःआ३
वय॰॰आग्नीध्रःओम्॰॰अध्वर्युःददे३हि॰॰आग्नीध्रःअ ८

नुप्रहर॰॰उत्तरेणगार्हपत्यंपरिक्रम्यहोतुरुत्तरतउपर्यंकस्थ
ल्वाग्नीध्रःप्रत्याधावयति॰॰पञ्चवंशोरश्चम्यपूर्ववन्मार्ज
येत्॰॰इत्याग्नीध्रःप्रयोगःसमाप्तः॰॰शके १७८९ प्रभवना
मसंवत्सरेचैत्रवद्य॰सोमवारेरामकृष्णजोशिलिखितंदर्भेप
रशरामंटजोगलेकरस्वदं॰॰

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017